वस्तुस्वाभाव्यादिति भेद इति मीमांसकादयः । “दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारमिति” कुमा० “सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनमिति” मृच्छ० “अथान्धकारं गिरिगह्वराणामिति” रघुः । अन्धकारस्य दृष्टिविघातकत्वं मनुष्याणामेव तेषामेवालोकसहकारेण दर्शनोदयात् उन्दुरादीनान्तु तदभावेऽपि दृष्टेरुदयात् । ततश्च आलोकरूपसहकारिविघटनेनास्य दृष्टिरोधकत्वमवसेयम् । यथार्थज्ञानविरोधिनि वेदान्तिमतसिद्धे अज्ञाने च । [राम्धकारे ।

**अन्धकारमय** त्रि० अन्धकार+प्राचुर्य्ये मयट् । प्रचु-

**अन्धकारि** पु० अन्धकः तदाख्यस्यासुरस्यारिः ६त० । शिवे अन्धकरिपुशब्देऽस्य विवृतिः ।

**अन्धकासुहृत्** पु० अन्धकस्य असून् हरति हृ—क्विप् तुक् च, अन्धकस्यासुरस्य असुहृत् रिपुर्वा ६त० । महादेवे ।

**अन्धकूप** पु० अन्धयतीत्यन्धः स चासौ कूपः । सान्धकारे कूपे । अन्धः कूपो यत्र ७ब० । नरकभेदे यथा “यस्त्विह वै भूतानामीश्वरकल्पितवृत्तीनामविविक्तपरव्यथानां स्वयं पुरुषोपकल्पितवृत्तिर्विविक्तपरव्यथोव्यथामाचरति स परत्रान्धकूपे तदभिद्रोहेण निपतति ॥ तत्र हासौ तैस्तैर्जन्तुभिः पशुमृगपक्षिसरीसृपैर्मशकयूकमत्कुणमक्षिकादिभिः, ये के चाभिद्रुग्धास्तैश्च सर्व्वतोऽभिद्रुह्यमाणस्तमसि विहतनिद्रानिर्वृतिरलब्धावस्थानः परिक्रामति यथा कुशरीरे जीवः इति भाग० ५स्क० । अन्धस्य दृष्ट्यभावस्य कूप इव । मोहे । सहि सर्व्वदृष्ट्यभावस्याकरः इति तस्य तथात्वम् । [अन्धकरणसाधने ।

**अन्धङ्करण** न० अन्धःक्रियतेऽनेन च्व्यर्थे कृ—करणे ख्युन् ।

**अन्धतमस** न० अन्धयति अन्ध+अच् ताम्यति अनेनेति तम-करणे—असि कर्म्म० अच् समासान्तः । निविड़ान्धकारे, तद्युक्ते नरकभेदे च ।

**अन्धतामस** न० तम एव तामसं प्रज्ञा० स्वार्थे अण् अन्धयतीति अन्धं कर्म्म० । निविड़ान्धकारे ।

**अन्धतामिस्र** न० तमिस्रा तमस्ततिः तमिस्रैव तामिस्रम् अन्धयतीत्यन्धम् कर्म्म० । निविड़ान्धकारे । अन्धम् अन्धकारकं तामिस्रं यत्र ७ब० । नरकविशेषे पु० न० । “तामिस्रमन्धतामिस्रं महारौरवरौरवौ नरकं कालसूत्रञ्च महानरकमेव चेत्यादिना” मनुना गणितेषु एकविंशतिनरकभेदेषु द्वितीये नरके तत्स्वरूपम् । “यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानके स्तामिस्रे नरके बलान्निपात्यते ॥ अनशनानिपानदण्डताड़नसन्तर्जनादिभिर्यातनाभिर्यात्यमानो जन्तुर्यत्र कश्मलमासादितएकदैव मूर्च्छामुपयाति तामिस्रप्राये ॥ एवमेव अन्धतामिस्रे । यस्तु “वञ्चित्वा पुरुषं दारादीनुपयुङ्क्ते यत्र शरीरी निपात्यमानो यातनास्थो वेदनया नष्टमतिर्नष्टदृष्टिश्च भवति यथा वनस्पतिर्वृश्च्यमानमूलस्तस्मादन्धतामिस्रं तमुपदिशन्ति इति भाग० ५स्क० ॥ सांख्यशास्त्रप्रसिद्धे भयविशेषविषयकेऽभिनिवेशे पु० । तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः इति सा० का० । “अभिनिवेशस्त्रासः दिव्यादिव्यशब्दविषयत्वेन दशविषयकत्वात् अणिमाद्यष्टविधैश्वर्य्यविषयत्वाच्चाष्टादशधा । तथा हि देवाः खल्वणिमादिकमष्टविधमैश्वर्य्यमासाद्य दश शब्दादीन् भुञ्जानाः ‘शब्दादयो भोग्यास्तदुपायाश्चाणिमादयोऽस्माकं असुरादिभि र्मास्म उपघानिषतेति बिभ्यति तदिदं भयमभिनिवेशोऽन्धतामिस्रोऽष्टादशविषयत्वादष्टादशधेति” सा० कौ० । वेदान्तिमतसिद्धे “देहे नष्टे अहमेव नष्टोऽस्मीत्येवं”रूपे अज्ञाने च ।

**अन्धत्व** न० अन्धस्य भावः । नेत्रघाते चक्षुषः स्वग्राहग्रासामर्थ्ये “एकादशेन्द्रियबधा” इत्यादि सा० का० (४९) व्याख्याने कौमुद्याम् “बाधिर्य्यं कुष्ठितान्धत्वजड़ताऽजिघ्रता तथा । मूकता कौण्यपङ्गुत्वक्लैव्योदावर्त्तमन्दता इत्यादिना श्रोत्रादीनां क्रमेण इन्द्रियाणां घातोदर्शितः ।

**अन्धपूतना** स्त्री २८४ सुश्रुतोक्ते बालग्रहभेदे “स्कन्दग्रहश्च प्रथमः स्कन्दापस्मार एव च शकुना रेवती चैव पूतना चान्धपूतने”त्युद्दिश्य । “योद्वेष्टि स्तनमतिसारकासहिक्काच्छर्दीभिर्ज्वरसहिताभिरर्द्यमानः दुर्वर्णः सततमधःशयोऽम्लगन्धिस्तं ब्रूयुर्वरभिषजोऽन्धपूतनार्त्तमिति” तल्लक्षणमुक्तम् ।

**अन्धमूषिका** स्त्री अन्धं दृष्ट्यभावं मुष्णाति मुष—ण्वुल् दीर्घः । देवताडवृक्षे तत्सेवने हि चक्षुष्मत्ता भवतीति वैद्यकप्रसिद्धम् ।

**अन्धम्भविष्णु** त्रि० अनन्धोऽन्धोभवति भू—च्व्यर्थे खिष्णुच् । अन्धीभवितरि ।

**अन्धम्भावुक** त्रि० अन्ध च्व्यर्थे भू—खुकञ् । अन्धोभवितरि

**अन्धस्** न० अद्यते अद—असुन् नुम् धश्च । ओदने । अस्तृतान्धसोदेवाः । “द्विजातिशेषेण यदेतदन्धसा” किरा० “विपानं शुक्रमन्धस इति” यजु० १९,७५ ।

**अन्धाहि** पु० अन्धोऽहिरिव । (कुचिया) इति प्रसिद्धे मत्स्ये ।

**अन्धवर्त्मन्** पु० अन्धं सूर्य्यप्रकाशरहितत्वादप्रकाशं वर्त्म यत्र । वायोः सप्तमे स्कन्धे । ‘मरुदिन्द्रः सरभसः साम-